# दिल्ली पब्लिक स्कूल, राँची

## अभ्यास परीक्षा - II (2016-17)

कक्षा –नवमी　　　　　　　　　　　　　　　　　　　　　　विषय–संस्कृतम्

समय– तीन घंटा　　　　　　　　　　　　　　　　　　　　　पूर्णांकाः–90

---

## खण्डः –क

### अपठित अवबोधन　　　　　　[10]

**1.** अनुच्छेदं पठित्वा प्रष्नानाम् उत्तराणि संस्कृतभाषायां लिखत

भगवान् बुद्धः एकस्य कृषकस्य प्रार्थनां स्वीकृत्य तस्य ग्रामं गत्वान्। कृषकेन तस्य प्रवचनानाम् आयोजनम् कृतम्। यदा भगवान बुद्ध प्रवचनम् श्रावयति, तदैव कृषकस्य वृषभौ रोगग्रस्तौ अभवताम्। सः कृषकः

तस्मिन् एव क्षणे प्रवचनं विहाय वृषभौ चिकित्सकस्य समीपे नीतवान्। अन्यस्मिन् अहनि ग्रामवासिनः बुद्धम् अवदन् – सः कृषकः तु स्वार्थी अस्ति, यः भवतः प्रवचनं त्यक्त्वा वृषभयोः समीपम् गतवान्। बुद्धः प्रत्यवदत्–कृषकेण मया दत्ता षिक्षा सार्थका कृता, सः कर्मणः महतव्म् जानाति। यदि सः न गच्छेत्

तदा वृषभौ मृतौ स्याताम्।मम षिक्षा व्यार्था स्यात्। सर्वे बुद्धस्य वचनम् श्रुत्वा नतमस्तकाः अभवन्।

**I.** एकपदेन उत्तरत　　　　　　**[½X4=2]**

(क) कौ रोगग्रस्तौ अभवताम्?

(ख) कृषकः कस्य महत्वम् जानाति स्म?

(ग) कस्य प्रार्थनाम् स्वीकृत्य बुद्धः ग्रामं गतवान्?

(घ) सर्वे बुद्धस्य वचनम् श्रुत्वा कीदृषाः अभवन्

**II.** एकवाक्येन उत्तरत　　　　　　**[1X2=2]**

(क) यदि कृषकः प्रवचनं एव श्रृणुयात् तदा किम् भवेत्?

(ख) प्रवचनं विहाय कृषकः किम् अकरोत्?

**III.** अनुच्छेदस्य कृते समुचितं षीर्षकं दीयताम्।　　　　　　**[2]**

**IV.** प्रदत्तविकल्पेभ्यः रिक्तस्थानस्य कृते उचितं उत्तरं चित्वा लिखत　　　　　　**[1X4=4]**

**(i)** 'मम षिक्षा तु'....... अत्र 'मम' सर्वनामपदं कस्मै प्रयुक्तम्?

(क) कृषकाय　　(ख) ग्रामवासिने　　(ग) बुद्धाय　　(घ) चिकित्साय

**(ii)** 'निरर्थका' एतस्य किं विपर्यय पदं गद्यांषे प्रयुक्तम् अस्ति?

(क) सार्थका　　(ख) व्यर्था　　(ग) नतमस्तकाः　　(घ) स्वार्थी

**(iii)** 'अहनि' पदस्य किं विषेषणं गद्यांषे प्रयुक्तम् अस्ति?

(क) एकस्य　　(ख) तस्मिन्　　(ग) अन्यस्मिन्　　(घ) समीपे

**(iv)** गतवान् क्रियायाः कतृपदम् अत्र किम् अस्ति?

(क) कृषकः　　(ख) बुद्धः　　(ग) वृषभः　　(घ) चिकित्सकः

## खण्डः –ख

## रचनात्मक –कार्यम् [15]

**2.** पितुः पदोन्नति–विषयकं मित्रं प्रति पत्रं मंजूषायां प्रदतैः पदैः पूरयित्वा उत्तरपुस्तिकायां लिखत– **[½X10=5]**

प्रिय मित्र सुधीर!

**(i)**........... नमोनमः,

अत्र कुषलं तत्रास्तु। इदं **(ii)**........... भवच्चेतः प्रसादम् गमिष्यति यत् मम पूज्याः पितृपादाः अधुना विद्यालयस्य **(iii)**........... अलङ्कुर्वन्ति। तेषा इयं पदोन्नतिः लोकप्रिताकारणात् स्वविषये **(iv)**........... च संजाता। आगामिनी **(v)**........... अस्माभिः निमंत्रिताः सर्वे प्राध्यापकाः **(vi)**........... मम गृहम् आगमिष्यन्ति। अस्मिन् **(vii)**........... भवताऽपि अवष्यमेव **(viii)**........... । इदम् मम **(ix)**........... अस्ति।

**(x)**........... मित्रम्

प्रवीण कुमारः

मंजूषा

| |
|---|
| निवेदनम्, रविवासरे, सप्रेम, भवदीयं, विज्ञाय, नैपुण्यकारणात्, प्राचार्यपदम्, जलपानाय, आगन्तव्यम्, अवसरे |

**3.** मंजुषायां प्रदत्तषब्दानां सहायतया चित्रं दृष्ट्वा पंचवाक्यानि संस्कृतेन लिखत– **[2X5=10]**

मंजूषा –

अथवा

अतिवृष्टिम्’ विषयम् अधिकृत्य संस्कृतेन पंचवाक्यानि लिखत–

मंजूषा

| |
|---|
| यथा अनावृष्टिः, हानि, सर्वत्र जलम्, पषवः पक्षिणः षस्यानि, वृक्षाणाम्, म्रियन्ते, नष्यन्ति, अत्यधिकेन उन्मूलनेन, क्षेत्रेषु, गृहाणि, प्रसरन्ति, रोगाः, हाहाकारः। |

## खण्डः –ग

## अनुप्रयुक्त व्याकरण [30]

**4.** अधोलिखितप्रष्नानां उत्तराणि विकल्पेभ्यः चित्वा उत्तर पुस्तकायां लिखत– **[1X6=6]**

**(i)...........** आखेटाय वनं अगच्छताम्।

(क) राजा (ख) राजानौ (ग) राज्ञः (घ) राजानः

**(ii)** सैनिकाः मार्गे ............चौरम् अपष्यन्।

(क) गच्छत् (ख) गच्छन् (ग) गच्छन्तम् (घ) गच्छता

**(iii)** राजा जनकस्य राजसभा .................अलंकृता आसीत्।

(क) विद्वान् (ख) विदुषा (ग) विद्वदभिः (घ) विदुषाम्

**(iv) ----------**कुत्र गमिष्यति?

(क) भवान् (ख) भवत् (ग) भवतः (घ) भविष्यन्

**(v)** सर्वे जनाः ......................हितम् आचरन्ति।

(क) आत्मन् (क) आत्मानः (क) आत्मनः (क) आत्मानाम्

**(vi)** ..................सुदर्षनषर्मा नाम विद्वान कः अस्ति?

(क) भवतः (क) भवताम् (क) भवत्सु (क) भवद्भिः

**5.** उचितसंख्यापदैः रिक्तस्थानानि पूरयत **[1X6=6]**

**(i)......(1)......** सरोवरे रक्तकमलानि विकसन्ति।

**(ii)......(3)......** कन्याभ्यः फलानि देहि।

**(iii)** ब्राह्माणस्य ...... **(4)......** पुत्राः आसन्।

**(iv)** कालिदासेन **...(3)......** नाटकानि रचितानि।

**(v)......(5)......** बालिकासु एषा रूपवती अस्ति।

**(vi)......(1)......** छात्रा अत्र न पठति।

**6.** उचितधातुरूपेण रिक्तस्थानानि पूरयत **[1X6=6]**

(i) सर्वे भारतीयाः देषहिताय ..................... ।

(क) चिन्तयेत् (ख) चिन्तयेः (ग) चिन्तयन्ते (ख) चिन्तयेयुः

(ii) छात्राय अध्ययनं .................. ।

(क) रोचेत (ख) रोचेरन् (ग) रोचेथाः (घ) रोचेमही

(iii) वयम् परिश्रमं कृत्वा विद्याधनं ..................... ।

(क) लभेमहि (ख) लभेवहि (ग) लभेरन् (घ) लभेध्वम्

(iv) त्वम् विद्वान ................... ।

(क) अस्तु (ख) एधि (ग) स्तम् (घ) स्त

(v) सूपकाराः भोजनं षीघ्रम ............... ।

(क) पचतु (ख) पचन्तु (ग) पचानि (घ) पचाम

(vi) वर्षाकाले मयूरः ................................ ।

(क) नृत्यतु (क) नृत्ये (क) नृत्यन्तु (क) नृत्येम्

**7.** उचितपदैः रिक्तस्थानि पूरयत **[1X6=6]**

(i) ...............हीनः नष्यति। (चरित्रं/ चरित्रेण/ चरित्रे)

(ii) ...............निकषा नगरम् अस्ति। (नद्याम् / नद्याः /नदीम्)

(iii) धावकः ....................कुषलः आसीत्। (धावनस्य /धावने /धावनाय)

(iv) ..................वामतः छात्राः अतिष्ठन (प्राचार्यम् / प्राचार्यात् /प्राचार्यस्य )

(v) ..................प्रमादं न कुर्यात् (उद्यमेन / उद्यमात् / उद्यमस्य )

(vi) अध्यापिका ..................स्निह्यति (छात्रान्/ छात्रेभ्यः / छात्रेषु)

**8.** प्रकृतिप्रत्ययं संयोज्य विभाज्य वा लिखतः– **[1X6=6]**

(i) अष्टावक्रः उच्चैः .................(हस्+क्तवतु)

(ii) तं ..................दृष्ट्वा सभासदाः स्तब्धाः अभवन्। (हस्+षतृ)

(iii) <u>याचमानम्</u> नरं पष्य।

(iv) वाल्मिकिना रामायणम् रचितम्।

(v) सः वेगेन आश्रमं ..................(आ+गम्+क्तवतु)

(vi) धनं .................महिला प्रसन्ना भवति। (दा+षतृ)

## <u>खण्डः –घ</u>

## पठित अवबोधनम्

**9.** अधोलिखितं गद्यांष पठित्वा प्रष्नानां उत्तरं लिखत

ततष्च सा साध्वी भर्तुः षुश्रुषां कृत्वा भिक्षाम् आदाय मुनेः अन्तिकम् अगच्छत्। सः च मुनिः बद्धांजलिः तम् अवदत् – कथं त्वया अनन्यगोचरो बलाकावृतांतो ज्ञातः इति ब्रुहि ततो भिक्षां ग्रहीष्ये। साऽवदत्–मुने! न भतृसेवायाः अपरं कञ्चन धर्म करोम्यहम।तत्प्रसादेन एव मे एतादृषं विज्ञानम्। किञ्च इतः धर्मव्याधाख्यं कञ्चन मांसविक्रयिणं गत्वा एतत् पृच्छ। ततस्ते श्रेयो भविष्यति, त्वञ्च निरहङ्कारो भविष्यसि इति।

**I.** एकपदेन उत्तरत **[½X2=1]**

**(i)** मुनेः समीपम् का अगच्छत्?

**(ii)** धर्मव्याधः कः आसीत्?

**II.** एकवाक्येन उत्तरत **[2]**

धर्मव्याधस्य समीपं गमनेन मुनेः किं कल्याणं भवष्यिति?

**III.** यथानिर्देषम् उत्तरत – **[½X4=2]**

**(i)** 'करोमि' एतस्य क्रियापदस्य किं कतृंपद अत्र प्रयुक्तम् अस्ति?

**(ii)** 'सेवाम' इत्यर्थे गद्यांषे किम् पदम् प्रयुक्तं अस्ति?

**(iii)** 'अहंकारः' एतस्य विपर्ययं गद्यांषात् चित्वा लिखत।

**(iv)** 'त्वञ्च निरहङ्कार' .................' अत्र त्वम् एतत् सर्वनाम पदम् कस्मै प्रयुक्तं अस्ति?

**10.** निम्नलिखितं पद्यांष पठित्वा प्रष्नान् उत्तरत

अहो! एषां वरं जन्म सर्वप्राण्युपजीवनम्।
धन्या महीरूहा येभ्यो निराषा यान्ति नार्थिनः।।

**I.** एकपदेन उत्तरत **[½X2=1]**

**(i)** के धन्या?

**(ii)** अर्थिनः केभ्यः निराषाः न यान्ति?

**II.** एकवाक्येन उत्तरत **[2]**

वृक्षाणां जन्म कथं वरं अस्ति?

**III.** यथा निर्देषम् उत्तरत– **[1X2=2]**

**(i)** वृक्षाः पदस्य पर्यायपदं किम् अस्ति?

**(क)** निराषा **(ख)** अर्थिनः **(ग)** महीरूहाः **(घ)** उपजीवनम्

**(ii)** ष्लोके 'एषाम्' पदम् कस्मै प्रयुक्तम्?

**(क)** महीरूहेभ्यः **(ख)** पत्रेभ्यः **(ग)** फलेभ्यः **(घ)** बीजेभ्यः

**11.** नाट्यांष पठित्वा प्रष्नान् उत्तरत

तन्तुवायः – महाराज् तन्तुवचनं मम व्यवसायः अतः काव्यरचनायां महाकवि तुल्यः मम अभ्यासः

न अस्ति तथापि किंचित् निवेदयामि। श्रोतुमर्हति भवन्तः–

काव्यं करोमि  नहि चारूतरं करोमि,

यत्नात् करोमि यदि चारूतरं करोमि,

भूपालमौलिमणिमण्डितपादपीठ,

हे साहसङ्क! कवयामि वयामि यामि।।

भोजः– साधु कुविन्द! साधु! कीदृषी लालित्यपूर्णा पदयोजना 'कवयामि वयामि यामि– धन्योऽसि त्वम्। अहं अपि आत्मनं धन्यं मन्ये यस्य राज्ये तन्तुवायाः कुम्भकाराः अयस्काराः षिल्पिनः, श्रमिकाः अपि ललितां काव्यरचनां कुर्वन्ति। (तन्तुवायं प्रति) भो कविवर। गृहाण पुष्फलं पारितोषिकम्। निज आवासं च प्रयाहि।

**I.** एकपदेन उत्तरत **[½X2=1]**

(i) 'कविवर' एतेन संबोधनपदेन कः संबोध्यते?

(ii) 'कवयामि, वयामि, यामि' एषा कस्य पदयोजना अस्ति?

**II.** एकवाक्येन उत्तरत

राजा आत्मनं किमर्थं धन्यं कथयति? **[2]**

**III.** यथानिर्देषम् उत्तरत **[1X2=2]**

(i) 'प्रभूतं ' इत्यर्थे किम् पदमत्र प्रयुक्तम्?

(क) पारितोषिकम्  (ख) पुष्कलं  (ग) स्वर्णमयम्  (घ) आवासम्

(ii) 'कुविन्द' एतस्य पदस्य पर्यायपदं नाट्यांषात् चित्वा लिखत।

**12.** अधोलिखितष्लोकयोः अन्वययोः रिक्तस्थानानि पूरयत **[½X10=5]**

(क) सर्वे भवन्तु सुखिनः, सर्वे सन्तु निरामयाः।
सर्वे भद्राणि पष्यन्तु, मा कष्चित्, दुखभाग्भवेत्।

अन्वयः – सर्वे ......(i) .....भवन्तु सर्वे ......(ii) .....सन्तु सर्वे ......(iii) .....पष्यन्तु ........(iv) .....दुखभाक् ........(v) .....भवेत्।

(ख) वेषभूषाषनोपासनापद्धति–

क्रीडना मोदसंस्कारवृत्यादिषु,

चद्धि भिन्नं सदप्यस्त्यभिन्नं सदा,

भूतले भाति तन्मामकं भारतम्।

अन्वयः – यत्– वेषभूषा ......(i) .....उपासनपद्धति क्रीडनामोदसंस्कार वृति...... (ii) ..... भिन्नं सत् ...... (iii) .....सदा ...... (iv) .....अस्ति .....(v) .....मामकं भारतम् भूतले भाति।

**13.** रेखांकितपदानि आधृत्य प्रष्ननिर्माणं कुरूत– **[1X5=5]**

**I.** मुनिः सर्वविदा पतिव्रतया <u>गृहीतातिथिसत्कारः</u> अभवत्।

II. गृहिण्या बलाकावृत्तान्तः ज्ञातः।

III. भारतं विष्वं कुटुम्बवत् आलोकयति।

IV. अत्र जनाः व्याधिना पीडिताः न भवेयुः।

V. अष्टावक्रः मिथ्याज्ञानगर्वितान पण्डितान् दृष्ट्वा हसति।

**14.** अधोलिखितवाक्यानि कथाक्रमानुसारेण संयोज्य लिखत– **[½X10=5]**

I. जलबिन्दवः षुष्कपर्णानाम् उपरि पतित्वा मधुरं सङ्गीतं जनयन्ति स्म।

II. जलमन्विष्यमाणः सः कञ्चन आह्लादकरं षब्दं श्रुतवान्।

III. आश्रमे सः ध्वनेः सूक्ष्मक्रमस्य अध्ययनम् कृतवान्।

IV. पिपासाकुलः सः जलस्य अन्वेषणाय इतस्ततः अगच्छत्।

V. अस्य अन्वेषणस्य परिणामस्वरूपम् एव सः मृदङ्गस्य आविष्कारम् अकरोत्।

VI. अग्रे गत्वा सः पर्वतात् पततः जलबिन्दून् अपष्यत्।

VII. एकदा स्वातिनामकः मुनिः पिपासया पीडितः अभवत्।

VIII. प्रतिध्वनेः उत्पादनार्थम् आवष्यकं तं सूक्ष्मक्रमम् सः अन्विष्टवान्।

IX. एतत् दृष्ट्वा सः तृषाकुलतां विस्मृत्य वेगेन आश्रमम् आगच्छत्।

X. षब्दमनुसरन् सः अग्रे गन्तुमारभत।

**15.** प्रसङ्गानुसारं षुद्धम् अर्थं चित्वा लिखत– **[1X5=5]**

**(i)** नगरपालं समाहूयं आदिष्यताम्।

**(क)** उक्तवा **(ख)** आह्वानं कृत्वा **(ग)** उपगम्य **(घ)** उपसृत्य

**(ii)** त्वं भूयः नगरं याहि।

**(क)** षीघ्रम् **(ख)** त्वरितम् **(ग)** पुनः **(घ)** कदाचित्

**(iii)** धन्याः महीरूहाः येभ्यो निराषाः यान्ति न अर्थिनः।

**(क)** महीपालाः **(ख)** महीधराः **(ग)** पर्वताः **(घ)** द्रुमाः

**(iv)** मुनिः अहङ्कारम् उपगतः।

**(क)** पतितः **(ख)** उत्पतितः **(ग)**प्राप्तः **(घ)** समाप्तः

**(v)** तरवे नमः अस्तु।

**(अ)** वृक्षाय **(ख)** मानवे **(ग)**महीपाल **(घ)** गुरवे